# Laghu Shodha Nyas

## श्रीगणेशाय नमः

अस्य श्रीलघुषोढान्यासस्य दक्षिणामूर्तये ऋषये नमः (शिरसि), गायत्र्यै छन्दसे नमः (मुखे), गणेशग्रहनक्षत्रयोगिनीराशि पीठरूपिण्यै श्रीब्रह्मास्त्रविद्याबगलामुखी देवतायै नमः (हृदये), श्रीबगलाङ्गत्वेन न्यासे विनियोगाय नमः (करसम्पुटे)

ॐ ह्लीं क्लीं श्रीं ऐं अं कं खं गं घं ङं. आं ऐं अंगुष्ठाभ्यां नमः

ॐ ह्लीं क्लीं श्रीं ऐं इं चं छं जं झं ञं ईं क्लीं तर्जनीभ्यां नमः

ॐ ह्लीं क्लीं श्रीं ऐं उं टं ठं डं ढं णं ऊं सौः मध्यमाभ्यां नमः

ॐ ह्लीं क्लीं श्रीं ऐं एं तं थं दं धं नं ऐं ऐं अनामिकाभ्यां नमः

ॐ ह्लीं क्लीं श्रीं ऐं ओं पं फं बं भं मं औं क्लीं कनिष्ठिकाभ्यां नमः

ॐ ह्लीं क्लीं श्रीं ऐं अं यं रं लं वं शं षं सं हं ळं क्षं अः सौः करतलकरपृष्ठाभ्यां नमः।

एवमेव हृदयादि न्यासः

### ध्यानम्

**उद्यत्सूर्यसहस्राभां पीनोन्नतपयोधराम्।**
**पीतमाल्याम्बरधरां पीतभूषणभूषिताम्।।**
**गदामुद्गरहस्ताञ्च पीतगन्धानुलेपनाम्।**
**लसन्नेत्रत्रयां स्वर्णमुकुटोद्भासिमस्तकाम्।।**
**गणेशग्रहनक्षत्रयोगिनीं राशिरूपिणीम्।**
**देवीं पीठमयीं ध्यायेन्मातृकां बगलां पराम्।।**

सांख्यायनतन्त्रस्य द्वित्रिंशे पटले लघुषोढा, महाषोढान्यासस्य विधानं प्रदर्शितं। तद् विवरणामित्थं भवति –

# लघुषोढान्यासः

गणेशैः प्रथमोन्यासो द्वितीयस्तु ग्रहैर्मतः।
नक्षत्रैस्तु तृतीयः स्याद्योगिनीभिश्चतुर्थकः॥
राशिभिः पञ्चमो ज्ञेयः षष्ठः पीठैर्निगद्यते।
षोढान्यासस्त्वयं प्रोक्तः सर्वत्रैवापराजितः॥

## (१) गणेशन्यासः

बृहत् पद्धतौ मातृकान्यास स्थान सदृशः कार्यः
विघ्नेशो विघ्नराजश्च विनायक शिवोत्तमौ।
विघ्नकृद्विघ्नहर्ता च विघ्नराड्गणनायकः॥
एकदन्तो द्विदन्तश्च गजवक्त्रो निरञ्जनः।
कपर्दभृद्दीर्घमुखः शङ्कुकर्णो वृषध्वजः॥
गणनाथो गजेन्द्रश्च शूर्पकर्णस्त्रिलोचनः।
लम्बोदरो महानादश्चतुर्मूर्तिः सदाशिवः॥
आमोदो दुर्मदश्चैव सुमुखश्च प्रमोदनः।
एकपादो द्विजिह्वश्च शूरोवीरश्चषण्मुखः॥
वरदोवामदेवश्च वक्रतुण्डो द्वितुण्डकः।
सेनानीर्ग्रामणीर्मत्तो विमत्तोमत्त वाहनः॥
जटी मुण्डी तथा खड्गी वरेण्योवृषकेतनः।
भक्ष्यप्रियो गणेशश्च मेघनादो गणेश्वरः॥

ॐ ह्लीं क्लीं श्रीं ऐं अं श्रींयुक्ताय विघ्नेशाय नमः शिरसि
ॐ ह्लीं क्लीं श्रीं ऐं आं ह्रींयुक्ताय विघ्नराजाय नमः मुखवृत्ते
ॐ ह्लीं क्लीं श्रीं ऐं इं तुष्टियुक्ताय विनायकाय नमः दक्षनेत्रे
ॐ ह्लीं क्लीं श्रीं ऐं ईं शांतियुक्ताय शिवोत्तमाय नमः वामनेत्रे

ॐ ह्लीं क्लीं श्रीं ऐं उं पुष्टियुक्ताय विघ्नहृते नमः दक्षकर्णे
ॐ ह्लीं क्लीं श्रीं ऐं ऊं सरस्वतीयुक्ताय विघ्नकर्त्रे नमः वामकर्णे
ॐ ह्लीं क्लीं श्रीं ऐं ऋं रतियुक्ताय विघ्नराजे नमः दक्षनासापुटे
ॐ ह्लीं क्लीं श्रीं ऐं ॠं मेधायुक्ताय गणनायकाय नमः वामनासापुटे
ॐ ह्लीं क्लीं श्रीं ऐं लृं कांतियुक्ताय एकदन्ताय नमः दक्षगण्डे
ॐ ह्लीं क्लीं श्रीं ऐं ॡं कामिनीयुक्ताय द्विदन्ताय नमः वामगण्डे
ॐ ह्लीं क्लीं श्रीं ऐं ए मोहिनीयुक्ताय गजवक्त्राय नमः ऊर्ध्वोष्ठे
ॐ ह्लीं क्लीं श्रीं ऐं ऐं जटायुक्ताय निरञ्जनाय नमः अधरोष्ठे
ॐ ह्लीं क्लीं श्रीं ऐं ओं तीव्रायुक्ताय कपर्दभृते नमः ऊर्ध्वदन्तपंक्तौ
ॐ ह्लीं क्लीं श्रीं ऐं औं ज्वालिनीयुक्ताय दीर्घमुखाय नमः अधोदन्तपंक्तौ
ॐ ह्लीं क्लीं श्रीं ऐं अं नन्दायुक्ताय शङ्कुकर्णाय नमः जिह्वाग्रे
ॐ ह्लीं क्लीं श्रीं ऐं अः सुरसायुक्तायवृषध्वजाय नमः कण्ठे
ॐ ह्लीं क्लीं श्रीं ऐं कं कामरूपिणीयुक्ताय गणनाथाय नमः दक्षबाहुमूले
ॐ ह्लीं क्लीं श्रीं ऐं खं सुभ्रूयुक्ताय गजेन्द्राय नमः दक्षकूर्परे
ॐ ह्लीं क्लीं श्रीं ऐं गं जयिनीयुक्ताय शूर्पकर्णाय नमः दक्षमणिबन्धे
ॐ ह्लीं क्लीं श्रीं ऐं घं सत्यायुक्तायत्रिलोचनाय नमः दक्षकरांगुलिमूले
ॐ ह्लीं क्लीं श्रीं ऐं ङं विघ्नेशोयुक्ताय लम्बोदराय नमः दक्षकरांगुल्यग्रे
ॐ ह्लीं क्लीं श्रीं ऐं चं सुरूपायुक्ताय महानादाय नमः वामबाहुमूले
ॐ ह्लीं क्लीं श्रीं ऐं छं कामदायुक्ताय चतुर्मूर्तये नमः वामकूर्परे
ॐ ह्लीं क्लीं श्रीं ऐं जं मदविह्वलायुक्ताय सदाशिवाय नमः वाममणिबन्धे
ॐ ह्लीं क्लीं श्रीं ऐं झं विकटायुक्ताय आमोदाय नमः वामकरांगुलिमूले
ॐ ह्लीं क्लीं श्रीं ऐं ञं पूर्णायुक्तायदुर्मुखाय नमः वामकरांगुल्यग्रे
ॐ ह्लीं क्लीं श्रीं ऐं टं भूतिदायुक्ताय सुमुखाय नमः दक्षोरुमूले
ॐ ह्लीं क्लीं श्रीं ऐं ठं भूमियुक्ताय प्रमोदाय नमः दक्षजानुनि
ॐ ह्लीं क्लीं श्रीं ऐं डं शक्तियुक्ताय एकपदाय नमः दक्षगुल्फे
ॐ ह्लीं क्लीं श्रीं ऐं ढं रमायुक्तायद्विजिह्वाय नमः दक्षपादांगुलिमूले

ॐ ह्रीं क्लीं श्रीं ऐं णं मानुषीयुक्तायशूराय नमः दक्षपादांगुल्यग्रे
ॐ ह्रीं क्लीं श्रीं ऐं तं मकरध्वजायुक्ताय वीराय नमः वामोरुमूले
ॐ ह्रीं क्लीं श्रीं ऐं थं वीरिणीयुक्ताय षण्मुखाय नमः वामजानुनि
ॐ ह्रीं क्लीं श्रीं ऐं दं. भ्रकुटीयुक्ताय वरदाय नमः वामगुल्फे
ॐ ह्रीं क्लीं श्रीं ऐं धं लज्जायुक्ताय वामदेवाय नमः वामपादांगुलिमूले
ॐ ह्री क्लीं श्रीं ऐं नं दीर्घघोणायुक्ताय वक्रतुण्डाय नमः वामपादांगुल्यग्रे
ॐ ह्रीं क्लीं श्रीं ऐं पं धनुर्धरायुक्तायद्वितुण्डाय नमः दक्षपार्श्वे
ॐ ह्रीं क्लीं श्रीं ऐं फं यामिनीयुक्ताय सेनान्ये नमः वामपार्श्वे
ॐ ह्रीं क्लीं श्रीं ऐं बं रात्रियुक्ताय ग्रामण्ये नमः पृष्ठे,
ॐ ह्रीं क्लीं श्रीं ऐं भं चन्द्रिकायुक्तायमत्ताय नमः नाभौ,
ॐ ह्रीं क्लीं श्रीं ऐं मं शशिप्रभायुक्ताय विमत्ताय नमः जठरे
ॐ ह्रीं क्लीं श्रीं ऐं यं लोलायुक्तायमत्तवाहनाय नमः हृदये
ॐ ह्रीं क्लीं श्रीं ऐं रं चपलायुक्ताय जटिने नमः दक्षस्कन्धे
ॐ ह्रीं क्लीं श्रीं ऐं लं ऋद्धियुक्ताय मुण्डिने नमः गलपृष्ठे (ककुदिं)
ॐ ह्रीं क्लीं श्रीं ऐं वं दुर्भगायुक्तायखड्गिने नमः वामस्कन्धे,
ॐ ह्रीं क्लीं श्रीं ऐं शं सुभगायुक्ताय वरेण्याय नमः हृदयादि दक्षकरांगुल्यन्तम्
ॐ ह्रीं क्लीं श्री ऐं षं शिवायुक्ताय वृषकेतनाय नमः हृदयादि वामकरांगुल्यन्तम्,
ॐ ह्रीं क्लीं श्रीं ऐं सं दुर्गायुक्तायभक्ष्यप्रियाय नमः हृदयादि दक्षपादांगुल्यन्तम्
ॐ ह्रीं क्लीं श्रीं ऐं हं कालीयुक्ताय गणेशाय नमः हृदयादि वामपादांगुल्यन्तम्
ॐ ह्रीं क्लीं श्रीं ऐं ळं कालकुञ्जिकायुक्ताय मेघनादाय नमः हृदयादि गुह्यान्तम्
ॐ ह्रीं क्लीं श्रीं ऐं क्षं विघ्नहारिणीयुक्ताय गणेश्वराय नमः हृदयादिमूर्धान्तम्॥

## (२) ग्रहन्यासः

**रक्तं श्वेतं तथा रक्तं श्यामं पीतञ्च पाण्डुरम्।**
**कृष्णं धूम्रं धूम्रधूम्रं भावयेद्रविपूर्वकान्॥**

कामरूप धरान्देवान् दिव्याभरणभूषितान्।
वामोरुन्यस्त हस्तांश्च दक्षहस्तवरप्रदान्।।
शक्तयोऽपि तथाध्येया वराभय कराम्बुजाः।
स्वस्वप्रियाकंनिलयाः सर्वाभरणभूषिताः।।

**इति ध्यात्वा –**

ॐ ह्रीं क्लीं श्रीं ऐं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः रेणुकायुक्ताय सूर्याय नमः हृदयाधः हृज्जठरसन्धौ।
ॐ ह्रीं क्लीं श्रीं ऐं यं रं लं वं अमृतायुक्ताय चन्द्राय नमः भ्रूमध्ये
ॐ ह्रीं क्लीं श्रीं ऐं कं खं गं घं ङं. धर्मायुक्ताय भौमाय नमः नेत्रयो
ॐ ह्रीं क्लीं श्रीं ऐं चं छं जं झं ञं यशस्विनीयुक्ताय बुधाय नमः श्रोत्रकूपाधः
ॐ ह्रीं क्लीं श्रीं ऐं टं ठं ड ढ णं शाङ्करीयुक्ताय बृहस्पतये नमः कण्ठे
ॐ ह्रीं क्लीं श्रीं ऐं तं थं दं धं नं ज्ञानरूपायुक्ताय शुक्राय नमः हृदि
ॐ ह्रीं क्लीं श्रीं ऐं पं फं बं भं मं शक्तियुक्ताय शनैश्चराय नमः नाभौ
ॐ ह्रीं क्लीं श्रीं ऐं शं षं सं हं कृष्णायुक्ताय राहवे नमः मुखे
ॐ ह्रीं क्लीं श्रीं ऐं ळं क्षं धूम्रायुक्ताय केतवे नमः गुदे ॥

## (३) नक्षत्रन्यासः

ज्वलतकालानल प्रख्या वरदाभयपाणयः।
नतिपाण्योऽश्विनी पूर्वाः सर्वाभरणभूषिताः।।

**इति ध्यात्वा –**

ॐ ह्रीं क्लीं श्रीं ऐं अं आं अश्विन्यै नमः ललाटे
ॐ ह्रीं क्लीं श्रीं ऐं इं भरण्यै नमः दक्षनेत्रे
ॐ ह्रीं क्लीं श्रीं ऐं ईं उं ऊं कृत्तिकायै नमः वामनेत्रे
ॐ ह्रीं क्लीं श्रीं ऐं ऋं ॠं लृं लॄं रोहिण्यै नमः दक्षकर्णे
ॐ ह्रीं क्लीं श्रीं ऐं एं मृगशिरसे नमः वामकर्णे
ॐ ह्रीं क्लीं श्रीं ऐं ऐं आर्द्रायै नमः दक्षनासापुटे

| | | | |
|---|---|---|---|
| ॐ ह्लीं क्लीं श्रीं ऐं ओं औं | पुनर्वसवे | नमः | वामनासापुटे |
| ॐ ह्लीं क्लीं श्रीं ऐं कं | पुष्याय | नमः | कण्ठे |
| ॐ ह्लीं क्लीं श्रीं ऐं खं गं | आश्लेषायै | नमः | दक्षस्कन्धे |
| ॐ ह्लीं क्लीं श्रीं.ऐं घं डं. | मघायै | नमः | वामस्कन्धे |
| ॐ ह्लीं क्लीं श्रीं ऐं चं | पूर्वफाल्गुन्यै | नमः | पृष्ठे |
| ॐ ह्लीं क्लीं श्रीं ऐं छं जं | उत्तरफाल्गुन्यै | नमः | दक्षकूर्परे |
| ॐ ह्लीं क्लीं श्रीं ऐं झं ञं | हस्तायै | नमः | वामकूर्परे |
| ॐ ह्लीं क्लीं श्रीं ऐं टं ठं | चित्रायै | नमः | दक्षमणिबन्धे |
| ॐ ह्लीं क्लीं श्रीं ऐं डं | स्वात्यै | नमः | वाममणिबन्धे |
| ॐ ह्लीं क्लीं श्रीं ऐं ढं णं | विशाखायै | नमः | दक्षहस्ते |
| ॐ ह्लीं क्लीं श्रीं ऐं त थं दं | अनुराधायै | नमः | वामहस्ते |
| ॐ ह्लीं क्लीं श्रीं ऐं धं | ज्येष्ठायै | नमः | नाभौ |
| ॐ ह्लीं क्लीं श्रीं ऐं नं पं फं | मूलाय | नमः | कटिबन्धे |
| ॐ ह्लीं क्लीं श्रीं ऐं बं | पूर्वाषाढाये | नमः | दक्षोरौ |
| ॐ ह्लीं क्लीं श्रीं ऐं भं | उत्तराषाढायै | नमः | वामोरौ |
| ॐ ह्लीं क्लीं श्रीं ऐं मं | श्रवणाय | नमः | दक्षजानुनि |
| ॐ ह्लीं क्लीं श्रीं ऐं यं रं | धनिष्ठायै | नमः | वामजानुनि |
| ॐ ह्लीं क्लीं श्रीं ऐं लं | शततारकायै | नमः | दक्षजंघायाम् |
| ॐ ह्लीं क्लीं श्रीं ऐं वं शं | पूर्वभाद्रपदायै | नमः | वामजंघायाम् |
| ॐ ह्लीं क्लीं श्रीं ऐं ष सं हं | उत्तरभाद्रपदायै | नमः | दक्षपादे |
| ॐ ह्लीं क्लीं श्रीं ऐं ळं क्ष अं अः | रेवत्यै | नमः | वामपादे।। |

## (४) योगिनीन्यासः

### ध्यानम्

**कण्ठस्थानेविशुद्धौ नृपदलकमलेश्वेतवर्णां त्रिनेत्राम्।**
**हस्तैः खट्वाङ्गखड्गौ त्रिशिखमपि महाचर्म सन्धारयन्तीम्।।**

वक्त्रेणैकेनयुक्तां पशुजनभयदां पायसान्नैकसक्ताम्।
शवस्थां वन्देऽमृताद्यैः परिवृतवपुषं डाकिनीं वीरवन्द्याम्।।

इति ध्यात्वा –

ॐ ह्रीं क्लीं श्रीं ऐं डां डीं ड़मलवरयूं डाकिन्यै नमः
ॐ ह्रीं क्लीं श्रीं ऐं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः मां रक्ष रक्ष त्वगात्मानं नमः इति मन्त्रेण कण्ठस्थ षोडशदल विशुद्धिकमल कर्णिकायां डाकिनीं न्यस्य तद्दलेषु पुरोभागादि प्रादक्षिण्येन तदावरणशक्तीः न्यसेत्।

यथा

ॐ ह्रीं क्लीं श्रीं ऐं अं अमृतायै नमः, आं आकर्षिण्यै नमः, इं इन्द्राण्ये नमः, ईं ईशान्यै नमः, उं उमायै नमः, ऊं ऊर्ध्वकेश्यै नमः, ऋं ऋद्धिदायै नमः, ॠं ॠकारायै नमः, लृं लृकारयै नमः लॄं लॄंकारायै नमः, एं एकपदायै नमः, ऐं ऐश्वर्यात्मिकायै नमः, ओं ओंकारायै नमः, औं औषध्यै नमः, अं अम्बिकायै नमः, अः अक्षरायै नमः इति।

ततो ध्यानम् –

हृत्पद्मे भानुपत्रद्विवदनलसितां दंष्ट्रिणीं श्यामवर्णाम्।
अक्षं शूलं, कपालं डमरुमपि भुजैर्धारयन्तीं त्रिनेत्राम्।।
रक्तस्थां कालरात्रि प्रभृति परिवृतां स्निग्धभक्तैकसक्ताम्।
श्रीमद्वीरेन्द्रवन्द्यामभिमतफलदां राकिणीं भावयामः।।

इति ध्यात्वा –

ॐ ह्रीं क्लीं श्रीं ऐं रां रीं र म ल व र यूं राकिण्यै नमः
ॐ ह्रीं क्लीं श्रीं ऐं कं खं गं घं ङं. चं छं जं झं ञं टं ठं मां रक्ष रक्ष असृगात्मानं नमः इति हृदयस्थित द्वादशदलानाहतनलिन कर्णिकायां राकिणीं न्यस्य तद्दलेषु प्राग्वत् तदावृतिशक्तीर्न्यसेत्।

यथा

ॐ ह्लीं क्लीं श्रीं ऐं कं कालरात्र्यै नमः, खं खण्डितायै नमः, गं गायत्र्यै नमः, घं घण्टाकार्षिण्यै नमः, ङं ङार्णायै नमः, चं चण्डायै नमः, छं छायायै नमः, जं जयायै नमः, झं झंकारिण्यै नमः, ञं ज्ञानरूपायै नमः, टं टंकहस्तायै नमः, ठं ठंकारिण्यै नमः इति।

अथ

**दिक्पत्रे नाभिपद्मे त्रिवदनलसितां दंष्ट्रिणीं रक्तवर्णाम्।**
**शक्तिं दम्भोलिदण्डावभयमपि भुजैर्धारयन्तीं महोग्राम्।।**
**डामर्याद्यैः परीता पशुजनभयदां मांसधात्वेकनिष्ठाम्।**
**गौडान्नासक्तचितां सकलसुखकरीं लाकिनीं भावयामः।।**

इति ध्यात्वा –

ॐ ह्लीं क्लीं श्रीं ऐं लां लीं ल म ल व र यूं लाकिन्यै नमः ॐ ह्लीं क्लीं श्रीं ऐं डं ढं णं तं थं दं धं नं पं फं मां रक्ष रक्ष मांसात्मानं नमः इति नाभिगतं दशदलमणिपूरक सरोजकर्णिकायां लाकिनीं न्यस्य तद्दलेषु पूर्ववत्तत्परिवारशक्तीर्न्यसेत्।

यथा

ॐ ह्लीं क्लीं श्रीं ऐं डं डामर्यै नमः, ढं ढंकारिण्यै नमः, णं णार्णायै नमः, तं तामस्यै नमः, थं स्थाण्व्यै नमः, दं दाक्षायण्यै नमः, धं धात्र्यै नमः, नं नार्यै नमः, पं पार्वत्यै नमः, फं फट्कारिण्यै नमः।

तदनु –

**स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्राम्।**
**हस्ताब्जैर्धारयन्तीं त्रिशिखगुणकपालां कुशानात्तगर्वाम्।।**

मेदोधातु प्रतिष्ठामलिमदमुदितां बन्धिनीं मुख्ययुक्ताम।
पीतां दध्योदनेष्टामभिमतफलदां काकिनीं भावयामः।।

इति ध्यात्वा –

ॐ ह्लीं क्लीं श्री ऐं कां कीं क म ल व र यूं काकिन्यै नमः
ॐ ह्लीं क्लीं श्रीं ऐं बं भं मं यं रं ल मां रक्ष रक्ष मेद आत्मानं नमः
गुह्यस्थानगतषड्दल स्वाधिष्ठान सरसिजकर्णिकायां काकिनीं न्यस्य तद्दलेषु तदावरण शक्तीः प्राग्वन्न्यसेत्।

**यथा**

ॐ ह्लीं क्लीं श्रीं ऐं बं बन्धिन्यै नमः, भं भद्रकाल्यै नमः, मं महामायायै नमः, यं यशस्विन्यै नमः, रं रक्तायै नमः, लं लम्बोष्ठ्यै नमः।

ततः –

मूलाधारस्य पत्रे श्रुतिदल लसिते पञ्चवक्त्रां त्रिनेत्राम्।
धूम्राभामस्थिसंस्थां सृणिमपि कमलं पुस्तकं ज्ञानमुद्राम्।।
विभ्राणां बाहुदण्डैः सुललित वरदा पूर्व शक्त्यावृतां ताम्।
मुद्गान्नासक्तचित्तां मधुमदमुदितां साकिनीं भावयामः।।

इति ध्यात्वा –

ॐ ह्लीं क्लीं श्रीं ऐं सां सीं स म ल व र यूं साकिन्यै नमः
ॐ ह्लीं क्लीं श्रीं ऐं वं शं षं सं मां रक्ष रक्ष अस्थ्यात्मानं नमः
इति पायूपस्थमध्यगत चतुर्दल मूलाधार कमलकर्णिकायां साकिनीं न्यस्य तद्दलेषु पूर्ववत्तदावृत्ति शक्तीर्न्यसेत्।

**यथा**

ॐ ह्लीं क्लीं श्रीं ऐं वं वरदायै नमः शं श्रियै नमः, षं षण्डायै नमः, सं सरस्वत्यै नमः।

**भ्रूमध्ये बिन्दुपद्मे दलयुगकलिते शुक्लवर्णां कराब्जै।**
**विभ्राणां ज्ञानमुद्रां डमरुकममलामक्षमालां कपालम्।।**
**षड्वक्त्रांमज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्ताम्।**
**हारिद्रान्नैकसक्तां सकलसुखकरीं हाकिनीं भावयामः।।**

**इति ध्यात्वा –**

ॐ ह्रीं क्लीं श्रीं ऐं हां हीं ह म ल व ल यूं हाकिन्यै नमः
ॐ ह्रीं क्लीं श्रीं ऐं हं क्षं मां रक्ष रक्ष मज्जात्मानं नमः
इति भ्रूमध्यगतद्विदलाज्ञा कमलकर्णिकायां हाकिनीं न्यस्य तद्दक्षवामदलयोः क्रमेण –
ॐ ह्रीं क्लीं श्रीं ऐं हं हंसवत्यै नमः, क्षं क्षमावत्यै नमः
इति तच्छक्तिद्वयं न्यसेत्। तदनु –

**मुण्डव्योमस्थपद्मे दशशतदलके कर्णिका चन्द्रसंस्थाम्।**
**रेतोनिष्ठां समस्तायुधकलितकरां सर्वतोवक्त्र पद्माम्।।**
**आदिक्षान्तार्ण शक्तिप्रकरपरिवृतां सर्ववर्णां भवानीम्।**
**सर्वान्नासक्तचित्तां परशिवरसिकां याकिनीं भावयामः।।**

**इति ध्यात्वा –**

ॐ ह्रीं क्लीं श्रीं ऐं यां यीं य म ल व र यूं याकिन्यै नमः
ॐ ह्रीं क्लीं श्रीं ऐं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः
कं खं गं घं ङं. चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं (५१) मां रक्ष रक्ष शुक्रात्मानं नमः इति ब्रह्मरन्ध्रगत सहस्त्रदलसरसिजकर्णिकायां याकिनीं न्यस्य तद्दलेषु प्रतिविंशतिदलं तदावरण शक्तीः अमृताद्याः क्षमावत्यन्ताः पूर्वोक्ताः प्राग्वन्न्यसेत्।

## (५) राशिन्यासः

रक्तश्वेतहरित्पाण्डुचित्र कृष्ण पिशङ्गकान्।
कपिशवभ्रुकिर्मीरकृष्णधूम्रान क्रमात्स्मरेत्।।

राशीनिति शेष। इति ध्यात्वा –

ॐ ह्लीं क्लीं श्रीं ऐं अं आं इं ईं मेषाय नमः दक्षिणपादे,
ॐ ह्लीं क्लीं श्रीं ऐं उं ऊं वृषाय नमः लिङ्ग दक्षभागे,
ॐ ह्लीं क्लीं श्रीं ऐं ऋं ॠं लृं लॄं मिथुनाय नमः दक्षकुक्षौ,
ॐ ह्लीं क्लीं श्रीं ऐं एं ऐं कर्काय नमः हृदयदक्ष भागे,
ॐ ह्लीं क्लीं श्रीं ऐं ओं औं सिंहाय नमः दक्षबाहुमूले,
ॐ ह्लीं क्लीं श्रीं ऐं अं अः शं षं सं हं ळं कन्यायै नमः दक्षशिरोभागे।
ॐ ह्लीं क्लीं श्रीं ऐं कं खं गं घं ङं. तुलायै नमः वामशिरोभागे
ॐ ह्लीं क्लीं श्रीं ऐं चं छं जं झं ञं वृश्चिकाय नमः वामबाहुमूले
ॐ ह्लीं क्लीं श्रीं ऐं टं ठं डं ढं णं धनुषे नमः हृदय वामभागे,
ॐ ह्लीं क्लीं श्रीं ऐं तं थं दं धं नं मकराय नमः वामकुक्षौ
ॐ ह्लीं क्लीं श्रीं ऐं पं फं बं भं मं कुम्भाय नमः लिङ्गवामभागे
ॐ ह्लीं क्लीं श्रीं ऐं यं रं लं वं क्षं मीनाय नमः वामपादे।।

## (६) पीठन्यासः

पीठांस्तु विन्यसेद्देवि मातृकास्थानके प्रिये
सितासितारुण श्याम हरित्पीतान्यनुक्रमात्।
पुनः क्रमेण देवेशि पञ्चाशत् पीठसञ्चयः।।

इति भावयित्वा मातृकाभिसमं पूर्वोक्तेषु तासां स्थानेषु पीठानि क्रमेण विन्यसेत्।

यथा

ॐ ह्लीं क्लीं श्रीं ऐं अं कामरूपाय नमः शिरसि,

ॐ ह्लीं क्लीं श्रीं ऐं आं वाराणस्यै नमः मुखवृत्ते

ॐ ह्लीं क्लीं श्रीं ऐं इं नेपालाय नमः दक्षनेत्रे

ॐ ह्लीं क्लीं श्रीं ऐं ईं पौण्ड्रवर्धनाय नमः वामनेत्रे

ॐ ह्लीं क्लीं श्रीं ऐं उं पुरस्थित काश्मीराय नमः दक्षकर्णे

ॐ ह्लीं क्लीं श्रीं ऐं ऊं कान्यकुब्जाय नमः वामकर्णे

ॐ ह्लीं क्लीं श्रीं ऐं ऋं पूर्णशैत्याय नमः दक्षनासापुटे

ॐ ह्लीं क्लीं श्रीं ऐं ॠं अर्बुदाचलाय नमः वामनासापुटे

ॐ ह्लीं क्लीं श्रीं ऐं लृं आम्रातकेश्वराय नमः दक्षगण्डे

ॐ ह्लीं क्लीं श्रीं ऐं लॄं एकाम्राय नमः वामगण्डे

ॐ ह्लीं क्लीं श्रीं ऐं एं त्रिस्त्रोतसे नमः उध्र्वोष्ठे

ॐ ह्लीं क्लीं श्रीं ऐं ऐं कामकोटये नमः अधरोष्ठे

ॐ ह्लीं क्लीं श्रीं ऐं ओं कैलासाय नमः ऊर्ध्वदन्तपंक्तौ

ॐ ह्लीं क्लीं श्रीं ऐं औं भृगुनगराय नमः अधो दंतपंक्तौ

ॐ ह्लीं क्लीं श्रीं ऐं अं केदाराय नमः जिह्वाग्रे

ॐ ह्लीं क्लीं श्रीं ऐं अः चन्द्रपुष्करिण्यै नमः कण्ठे

ॐ ह्लीं क्लीं श्रीं ऐं कं श्रीपुराय नमः दक्षबाहुमूले

ॐ ह्लीं क्लीं श्रीं ऐं खं ओंकाराय नमः दक्षकूर्परे

ॐ ह्लीं क्लीं श्रीं ऐं गं जालन्धराय नमः दक्षमणिबन्धे

ॐ ह्लीं क्लीं श्रीं ऐं घं मालवाय नमः दक्षकरांगुलिमूले

ॐ ह्लीं क्लीं श्रीं ऐं ङं. कुलान्तकाय नमः दक्षकरांगुल्यग्रे

ॐ ह्लीं क्लीं श्रीं ऐं चं देवीकोटाय नमः वामबाहुमूले

ॐ ह्लीं क्लीं श्रीं ऐं छं गोकर्णाय नमः वामकूर्परे

ॐ ह्लीं क्लीं श्रीं ऐं जं मारुतेश्वराय नमः वाममणिबन्धे

ॐ ह्लीं क्लीं श्रीं ऐं झं अट्टहासाय नमः वामकरांगुलिमूले

ॐ ह्लीं क्लीं श्रीं ऐं ञं वैराजायै नमः वामकरांगुल्यग्रे
ॐ ह्लीं क्लीं श्रीं ऐं टं राजगेहाय नमः दक्षोरुमूले
ॐ ह्लीं क्लीं श्रीं ऐं ठं महापथाय नमः दक्षजानुनि
ॐ ह्लीं क्लीं श्रीं ऐं डं कोलापुराय नमः दक्षगुल्फे
ॐ ह्लीं क्लीं श्रीं ऐं ढं एलापुराय नमः दक्षपादांगुलिमूले
ॐ ह्लीं क्लीं श्रीं ऐं णं कालेश्वराय नमः दक्षपादांगुल्यग्रे
ॐ ह्लीं क्लीं श्रीं ऐं तं जयन्तिकायै नमः वामोरुमूले
ॐ ह्लीं क्लीं श्रीं ऐं थं उज्जयिन्यै नमः वाम जानुनि
ॐ ह्लीं क्लीं श्रीं ऐं दं चित्रायै नमः वामगुल्फे
ॐ ह्लीं क्लीं श्रीं ऐं धं क्षीरिकायै नमः वामपादांगुलिमूले
ॐ ह्लीं क्लीं श्रीं ऐं नं हस्तिनापुराय नमः वामपादांगुल्यग्रे
ॐ ह्लीं क्लीं श्रीं ऐं पं उड्डीशाय नमः दक्षपार्श्वे
ॐ ह्लीं क्लीं श्रीं ऐं फं प्रयागाय नमः वामपार्श्वे
ॐ ह्लीं क्लीं श्रीं ऐं बं षष्ठीशाय नमः पृष्ठे
ॐ ह्लीं क्लीं श्रीं ऐं भं मायापुर्यै नमः नाभौ
ॐ ह्लीं क्लीं श्रीं ऐं मं जलेशाय नमः जठरे
ॐ ह्लीं क्लीं श्रीं ऐं यं मलयाय नमः हृदये
ॐ ह्लीं क्लीं श्रीं ऐं रं श्रीशैलाय नमः दक्षस्कन्धे
ॐ ह्लीं क्लीं श्रीं ऐं लं मेरवे नमः गलपृष्ठे
ॐ ह्लीं क्लीं श्रीं ऐं वं गिरिवराय नमः वामस्कन्धे
ॐ ह्लीं क्लीं श्रीं ऐं शं महेन्द्राय नमः हृदयादि दक्षकरांगुल्यन्तम्
ॐ ह्लीं क्लीं श्रीं ऐं षं वामनाय नमः हृदयादि वामकरांगुल्यंतम्
ॐ ह्लीं क्लीं श्रीं ऐं सं हिरण्यपुराय नमः हृदयादि दक्षपादांगुल्यन्तम्
ॐ ह्लीं क्लीं श्रीं ऐं हं महालक्ष्मीपुराय नमः हृदयादि वामपादांगुल्यन्तम्
ॐ ह्लीं क्लीं श्रीं ऐं ळं ओड्याणाय नमः हृदयादि गुह्यान्तम्
ॐ ह्लीं क्लीं श्रीं ऐं क्षं छायाच्छत्राय नमः हृदयादिमूर्धान्तम्

(इति लघुषोढान्याससमाप्तः)



## About The Author


**Name :-** **Shri Yogeshwaranand Ji**
**Mb :-** **+919917325788, +919410030994**
**Email ;-** **shaktisadhna@yahoo.com**
**Web :** **http://anusthanokarehasya.com**


## Some Of the Books Written By Shri Yogeshwarnand Ji

**1. Baglamukhi Sadhna Aur Siddhi**




Download Click Here

2. **Mantra Sadhna**




Download Click Here

3. **Shodashi Mahavidya**




Download Click Here